**तृतीयसत्रार्द्धम्**

**द्वितीयपत्रम्**

**फलितज्योतिषम्**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** (15×2=30)

1. तामसौ ग्रहौ कौ?
2. सन्तानविचारः कस्मात् वर्गात् भवति?
3. कुजस्य वर्णः कः?

**अथवा**

स्थिरराशयः के?

4. पितृकारकः ग्रहः कः?
5. पश्चिमदिशायाः अधिपः कः?
6. सिंहस्याधिपतिः कः?

**अथवा**

नेत्रेशः कः?

7. रिपुभावः कः?
8. वाणीप्रदायको ग्रहः कः?
9. के केन्द्रभावाः?

**अथवा**

भास्करपुत्रस्य अवतारः कः?

10. मूलत्रिकोणे शुभफलं कियन्मितं भवति?
11. दुःसंज्ञकाः भावाः के?
12. तमोगुणप्रधाना शक्तिः का?

**अथवा**

राशेः नवमभागः कः?

13. बन्धुभाव: क: ?

14. द्वितीयभावेन के विषया: चिन्त्या: ?

15. धूमग्रह: कथं साधनीय: ?

**अथवा**

यामित्रभाव: क: ?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** (5×6=30)

16. प्राणपदसाधनं स्पष्टयत।

17. पितु: परोक्षे जन्मज्ञानं लिखत।

**अथवा**

भावफलानां शुभाशुभत्वं कथं ज्ञेयम्? विवेचयत।

18. ग्रहदृष्टिविचारं प्रतिपादयत।

19. सूतिकागृहे दीपादिज्ञानं विवेचयत।

**अथवा**

पितृसौख्यहानिकरयोगान् विचारयत।

20. लग्नद्रेक्काणवशादवयवविभागं सप्रयोजनं प्रदर्शयत।

**अथवा**

ग्रहाणाम् उच्चबलं चेष्टाबलं च विवृणुत।

**स. निबन्धात्मकमुत्तरं लिखत।** (1×20=20)

21. षड्वर्गसाधनं स्पष्टयत।

**अथवा**

अरिष्टभङ्गविचारं सप्रसङ्गं यथाग्रन्थं प्रतिपादयत।

**अथवा**

ससन्धीनां द्वादशभावानां साधनं स्पष्टयत।